कद्रुयेषान्त्वं सम्प्रमोऽधुना"। सर्गशब्दे ५२५० पृ० तद्व्यानवविधत्वं दृश्यम्। [गर्भदात्रीक्षुपे राजनि०।

**सृष्टिप्रदा** स्त्री सृष्टिं तज्जेतुं गर्भं प्रददाति प्र+दा-क।

**सृ(षृ)** हिंसायां क्र्या० प० सक० सेट्। सृणाति असारीत् सीर्णः सीर्णिः। षोपदेश एव न्याय्यः।

**सेक** गतौ भ्वा० आ० सक० सेट्। सेकते असेकिष्ट पर्युदासाच्च षोपदेशः। ऋदित् चङि न ह्रस्वः।

**सेक** पु० सिच-घञ्। सेचने जलादिना आर्द्रीकरणे हेमच०।

**सेकपात्र** न० सिच्यतेऽनेन सिच-करणे घञ् कर्म०। (सेंउनी) सेचनपात्रभेदे अमरः।

**सेकिम** न० सेकेन निर्वृत्तम् सेक-वा डिम। मूलके हेमच०

**सेक्तृ** पु० सिञ्चति रेतः सिच-तृच्। १पत्यौ हेमच०। २सेचके त्रि० स्त्रियां ङीप्।

**सेक्त्र** न० सिच-करणे ष्ट्रन्। सेकपात्रे सि० कौ०।

**सेचक** पु० सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल्। १मेघे २सेककर्त्तरि त्रि० मेदि०।

**सेचन** न० सिच-भावे ल्युट्। १जलादिना आर्द्रीकरणे २क्षरणे। करणे ल्युट्। ३सेचन्यां क्षुद्रसेकपात्र्यां स्त्री ङीप् मेदि०।

**सेटु** पु० सिट-उन्। (तरमुज) दृक्षे त्रिका०।

**सेतु** पु० सि-तुन्। १क्षेत्रादेर्जलधारणार्थे (आल) (जाङ्गाल) पदार्थे अमरः। २वरुणवृक्षे मेदि०। मन्त्रजपाङ्गे ३प्रणवात्मके मन्त्रे च स्वार्थे क। सेतुक वरुणवृक्षे शब्दर०। "सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः" मठादि० त०। सेतुभेदश्च। सीमाविवादशब्दे ५३०० पृ० उक्तः। "सेतुश्च द्विविधः प्रोक्तः खेयो बन्ध्यस्तथाऽपरः। तोयप्रवर्त्तनात् खेयो बन्ध्यस्तु तन्निवर्त्तनात्" नारदः। मन्त्रजपाङ्गसेतुश्च कालिकापु० ५५ अ० उक्तो यथा "मन्त्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः। स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्य्यति। नमस्कारो महामन्त्रो देव इत्युच्यते सुरैः। द्विजातीनामयं मन्त्रः शूद्राणां सर्वकर्मणि। अकारश्चाप्युकारश्च मकारश्च प्रजापतिः। वेदत्रयात् समुद्धृत्य प्रणवं निर्ममे पुरा। स उदात्तो द्विजातीनां राज्ञां स्यादनुदात्तकः। स्वरितश्चोरुजातानां समस्तापि तथा स्वरेत्। चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञकः। स चानुस्वारचन्द्राभ्यां शूद्राणां सेतुरुच्यते। निःसेतुकं यथा तोयं क्षणान्निम्नं प्रसर्पति। मन्त्रस्तथैव निःसेतुः क्षणात् क्षरति यज्वनाम्। तस्मात् सर्वेषु मन्त्रेषु चतुर्वर्णा द्विजादयः। पार्श्वयोः सेतुमाधाय जपकर्म समारभेत्। शूद्राणामादिसेतुर्वा द्विसेतुर्वा यथेच्छतः। द्विसेतवः समाख्याता सर्वदैव द्विजातयः"।

**सेतुबन्ध** पु० ६त०। लङ्कागमनार्थं श्रीरामेण नलकपिद्वारा कारिते समुद्रोपरि १आलीबन्धे २क्षेत्रादेरालीबन्धे च। "ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः। नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः। सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः। कीर्त्तिं गायन्तु ते लोकाः सर्वलोकमलापहाम्। इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम्। ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः। नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धनात्। ततोऽतिहृष्टः प्लवगेन्द्रयूथपैर्महानगेन्द्रप्रतिमैर्युतो नलः। बबन्ध सेतुं शतयोजनायतं सुविस्तरं पर्वतपादपैर्दृढम्" अध्यात्मरा० २ अ०। "सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम्। सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः। आनीय गङ्गासलिलं रामेशमभिषिच्य च। क्षिप्त्वा समुद्रे तद्भारं ब्रह्म प्राप्नोत्यसंशयः। कृतानि प्रथमेनाह्ना योजनानां चतुर्दश। द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः। तृतीयेन तथा चाह्ना योजनान्येकविंशतिः। चतुर्थेन तथा चाह्ना द्वाविंशतिः तथा कृतम्। पञ्चमेन त्रयोविंशद् योजनानां समन्ततः। बबन्ध सागरे सेतुं नलो वानरसत्तमः। तेनैव जग्मुः कपयो योजनानां शतं द्रुतम्। असंख्याताः सुवेलाद्रिं रुरुधुः प्लवगोत्तमाः" ४अ०।

**सेतुभेदिन्** पु० सेतुं भिनत्ति भिद-णिनि। दन्तीवृक्षे शब्दर०

**सेतुवृक्ष** पु० सेतुनामको वृक्षः। वरुणवृक्षे शब्दर०। २सेतूपरिस्थे वृक्षे च।

**सेत्र** न० सि-बन्धने ष्ट्रन्। (बेड़ि) निगड़े सि० कौ०।

**सेना** स्त्री सि-न, सह इनेन प्रभुणा वा। १सैन्ये अमरः। २जिनानां ३मातृभेदे हेमच०। [२सेनाया उपकरणे च।

**सेनाङ्ग** न० ६त०। १हस्त्यश्वरथपदातिसंघाते अमरः।

**सेनाचर** पु० सेनायां चरति चर-ट। सेनानुगामिनि "सेनाचरीभवदिभाननेति" नैष०। [केये २सेनापतौ च अमरः

**सेनानी** पु० सेनां देवसेनां वा नयति नी-क्विप्। १कार्त्ति-

**सेनापति** पु० ६त०। १कार्त्तिकेये २सैन्याध्यक्षे च मेदि०। "कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः। हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषिता। निमित्ते शकुने ज्ञाता वेत्ता चैव चिकित्सिते। कृतज्ञः कर्मणां शूरस्तथा